# RAMAKRISHNA MISSION VIDYAMANDIRA
**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, MAY 2018**
**SECOND YEAR (BATCH 2016-19)**
**SANSKRIT (General)**

Date : 28/05/2018
Time : 11.00 am – 2.00 pm
Paper : IV
Full Marks : 75

1. यथेच्छं प्रश्न**द्वय**स्योत्तरं प्रदेयम्। [2×15]
   - क) किं नाम गीतिकाव्यम्? गीतिकाव्यविषये एको निबन्धः समासेनोपस्थाप्यताम्।
   - ख) भाससमस्याविषये नातिदीर्घः प्रबन्धो विरचनीयः।
   - ग) समाजे साहित्ये च रामायणस्य प्रभाव आलोच्यताम्।
   - घ) गद्यकविबाणभट्टविषये एकः प्रबन्धो विरचनीयः।

2. यथाभिरुचि टीका**द्वयं** समाधेयम्। [2×5]
   मृच्छकटिकम्, दशकुमारचरितम्, पञ्चतन्त्रः, वेणीसंहारम्।

3. यथभिमत**मेकस्य** प्रश्नस्योत्तरं देयम्। [1×10]
   - क) ईशोपनिषदि प्रतिपादितम् आत्मनः स्वरूपं विशद्यताम्।
   - ख) ईशोपनिषदि विद्याविद्ययोः स्वरूपमालोच्यताम्।

4. क) **एका** व्याख्या करणीया। [1×5]
   - i) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
     ततो भूय इव ते तमो य उ विद्यायां रताः।
   - ii) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
     तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।

   **OR,**

   ख) स्वभाषया **एकस्य** मन्त्रस्यानुवादः कार्यः। [1×5]
   - i) असूर्या नाम ते लोका अन्धेन तमसावृताः।
     तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।
   - ii) ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
     तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम्।।

5. प्रश्न**स्यैक**स्योत्तरं समाधेयम्। [1×10]
   - क) रामायणरचनायाः पटभूमिका समालोच्यताम्।
   - ख) बालकाण्डे रामचन्द्रस्य गुणावली समुपस्थाप्यताम्।

6. स्वभाषया **एकस्या**नुवादः कार्यः। [1×4]
   - क) आत्मवान् को न जितक्रोधो द्युतिमान् कोऽनसूयकः।
     कस्य विभ्यति देवाश्च ज्ञातरोषस्य संयुगे।।
   - ख) जनकस्य कुले जाता देवमायेव निर्मिता।
     सर्वलक्षणसम्पन्ना नारीणामुत्तमा बधूः।।

7. क) **एका** व्याख्या कार्या। [1×6]

   i) यावत् स्थास्यन्ति गिरय: सरितश्च महीतले।
      तावद्रामायणी कथा लोकेषु प्रचरिष्यति।।

   ii) अकर्दममिदं तीर्थं भरद्वाज निशामय।
       रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा।।

**OR,**

ख) यथेच्छं प्रश्न**त्रितय**स्य समाधानं कार्यम्। [3×2]

   i) रामायणे वर्णित: आदिश्लोक: क: ?
   ii) रामायणस्य द्वितीयकाण्डस्य नाम किम्?
   iii) रामस्य वनवासगमनस्य कारणं किम्?
   iv) मारीचो रावणं किं समुपदिष्टवान्?
   v) हनुमान् सीतां प्रमाणरूपेण किम् अदर्शयत्।

———— × ————